॥ अथ शनिस्तोत्रम् ॥

श्रीः ॥ अस्य श्रीशनैश्चरस्तोत्रस्य दशरथ ऋषिः शनैश्चरो देवत त्रिष्टुपछंदः शनैश्चरप्रीत्यर्थे जपे विनियोगः ॥

दशरथ उवाच ॥

कोणाऽन्तको रौद्रयमोऽथ बभ्रुः कृष्णः शनिः पिंगलमंद सौरिः ॥ नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनंदनाय ॥ १ ॥

सुरासुरः किंपुरूषा गणेंद्रा गन्धर्वविद्याधरपन्नगाश्च ॥ पीड्यंति सर्वे विषमस्थितेन तस्मै नामः श्रीरविनंदनाय ॥ २ ॥

नरा नरेंद्राः पशवो मृगेंद्रा वन्याश्च ये कीटपतंगभृंगा ॥ पीड्यंति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनंदनाय ॥ ३ ॥

देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनाति ॥ पीड्यंति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनंदनाय ॥ ४ ॥

तिलैर्यवैर्माषगुडन्नदानैर्लोहेन नीलांबरदानतो वा ॥ प्रीणाति मंत्रैर्निजवासरे च तस्मै नमः श्रीरविनंदनाय ॥ ५ ॥

प्रयाकूले यमुनातटे च सरस्वती पुण्यजले गुहायाम् ॥ यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्रीरविनंदनाय ॥६॥

अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सूखी स्यात् ॥ गृहाद् गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनंदनाय नमः ॥ ७ ॥

स्रष्टा स्यंभूर्भुवनतरस्य त्राता हरिः संहरते पिनाकी ॥ एकस्त्रिधा ऋग्यजुःसाममूर्तितस्मै नमः श्रीरविनंदनाय नमः ॥८॥

शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशुबांधवैश्च ॥ पठेच्च सौख्यं भुवि भोगयुक्तं प्राप्नोति निर्वाणपदं परं सः ॥९॥

कोणस्थः पिंगलो बभ्रः कृष्णा रौद्राऽन्तको यमः ॥ सौरिःशनेश्चरो मंदः पिप्पलादेन संस्तुतः ॥ १० ॥

एतानि दश नामानि प्रातरुत्थाप यः पठेत् ॥ शनैश्चरकृता पीडा न कदाचिद्भविष्यति ॥ ११ ॥

इति श्रीदशरथप्रोक्तं शनैश्चरस्तोत्रं संपूर्णम् ॥

www.totalbhakti.com